National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(37): 248-250
© 2021 NJHSR
www.sanskritarticle.com

**डा.दु.फणियज्ञेश्वरयाजुलु**
सहायकाचार्यः, कृष्णयजुर्वेदविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा.दु.फणियज्ञेश्वरयाजुलु**
सहायकाचार्यः, कृष्णयजुर्वेदविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः

# वेदोऽखिलो धर्ममूलम्

**डा.दु.फणियज्ञेश्वरयाजुलु**

**प्रस्तावना -**

विद् ज्ञाने इत्यस्मात् धातोः घञ् प्रत्यये कृते वेदशब्दो निष्पद्यते। वेद शब्दः स्वरभेदेन अर्थद्वयवाचको भवति।अन्तोदात्तः वेद शब्दः दर्भ वाची भवति। आद्युदात्तः चेत् ज्ञानवाचकः। अयं वेद शब्दः आधाराधेययोः अभेदोपचारेण ज्ञानाधारभूते ग्रन्थेऽपि प्रयुज्यते।अनेकैः व्याख्याकारैः वेद शब्दस्य अर्थः बहुधा प्रपञ्चितः। अपौरुषेयं वाक्यं वेदः। वेद्यन्ते लभ्यन्ते धर्मादयः पुरुषार्थाः येन स वेदः। **इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः**[1]।। एवम् अलौकिकोपायबोधकम्**,** अपौरुषेयं, धर्मादि पुरुषार्थसाधकं, ज्ञानमयं वेदपदवाच्यं भवति।

तथाह मनुः-

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः**[2]।। इति

धर्मलक्षणम् -

न्यायशास्त्रे चतुर्विंशति गुणेषु धर्मः अन्यतमः परिकीर्तितः। स च अदृष्टशब्देन व्यपदिश्यते।"**अदृष्टौ धर्माधर्मौ**"[3]। शुभादृष्टो धर्मः गम्यत एव। न्यायशास्त्रे अदृष्टशब्दस्य व्युत्पत्तिः एवं प्रदर्शिता- कार्यकारणयोः यथासंख्यम् अव्यवहितपरप्राक्षणावच्छेदेन अवस्थान संरक्षणाय अदृष्टाभिदः अपूर्वशब्दः इति।

जैमिनिना प्रोक्तम्-

**विचारविषयो धर्मो लक्षणेन विवर्जितः।**
**मानेन वाऽथ लोपोपेतस्ताभ्यामिति विचिन्त्यते।।**
**लौकिकारहीनस्य तस्य किं नाम लक्षणम्।**
**मानशङ्का तु दूरेऽत्र प्रत्यक्षाद्यप्रवर्तनात्।।**
**चोदनागम्य आकारो ह्यर्थत्वे सति लक्षणम्।**
**अत एव प्रमाणश्च चोदनावात्र नो कुतः।।**[4] इति

यागादिरेव धर्मः -

"**वेदा हि यज्ञार्थमभि प्रवृत्ताः**" इत्यादि वाक्यैः यज्ञसम्पादनार्थमेव यज्ञानां प्रवृत्तिरिति ज्ञायते। वैज्ञानिकदृष्ट्या यज्ञे अग्निना सह संयोग एव सृष्टिरचनायाः कारणं भवति इत्युच्यते। ब्रह्माण्डस्योद्गमभित्तिः यज्ञो वर्तते।" **यज्ञो बभूव भुवनस्य गर्भः**[5]"। सर्वस्यापि जगतः सत्वं अस्मिन् यज्ञे निहितं वर्तते। सृष्टेः लयकालेऽपि यज्ञ एव अवशिष्यत इति ब्राह्मण वाक्यम्- "**यज्ञ एवान्ततः प्रतितिष्ठति**[6]" इति। यज्ञे समष्टिभावनायाः सद्भावात् ततः विश्वकल्याणचेतना सञ्जायते। तथा च गीतायाम् -

**सह यज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक्**[7]।। इति

यज्ञः इष्टकामधुग्भवति। सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्। सम्पूर्णे वैदिक साहित्ये प्रतिपाद्य विषयोऽस्ति धर्मः। स च धर्मः यागादिरूपः इति मीमांसकाः। "**यागादिरेव धर्मः**[8]" इति। पुनः " **यज्ञेन यज्ञमयजन्त देवाः**[9]**"** इति मन्त्रार्थ विचारेण धर्मस्य मूलभूतविषयः स्पष्टम् अवगम्यते।

**आचारो धर्मः -**

पुण्यं कर्म धर्मः। पापं कर्म अधर्मः। पुण्यं कर्म अनुष्ठेयं भवति। पापं कर्म त्याज्यं भवति। एतत् कर्मणां कर्तव्याकर्तव्यनिश्चयः शास्त्रमुखादेव अवगन्तव्यः। अत एव गीतायां स्मर्यते-

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**
**न स सिद्धि मवाप्नोति न सुखं न परां गतिम्।।**
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्वविधानोक्तं कर्म कर्तुमिहार्हसि**[10]।। इति।

अहितं प्रतिषिध्य हितं व्यवस्थापयतीति शास्त्रम्। अतः निखिल स्थूलसूक्ष्मादि तत्वज्ञानाय विशिष्य अचिन्त्यतत्वावगमाय वेदशास्त्रं विहाय अन्यः उपायः कोऽपि न विद्यते। सर्वस्यापि प्राणिजातस्य श्रेयः प्राप्तये अनुसरणीयाः अनेके धर्मविषयाः वेदशास्त्रेषु उपदिष्टाः वर्तन्ते।

**"मा हिंस्यात् सर्वभूतानि, मा विद्विषावहै, स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः**[11]" इत्यादिभिः अहिंसा उपदिष्टा।

**" असतो मा सद्गमय, सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः**[12]" **सत्यं वद। धर्मं चर**[13]" इत्यादिना सत्यस्वरूपं निगदितम्।

**"ब्रह्मचारी चरति वेविषद्विषः, स देवानां भवत्येकमङ्गम्**[14] **ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत**[15]" इत्यादिभिः ब्रह्मचर्यमहिमा प्रतिपादितः अस्ति।

**"न कर्मणा न प्रजया धनेन**[16] **, मा गृधः कस्य स्विद् धनम्**[17]" इति अपरिग्रहरूपं त्यागव्रतं बोधितम्।

अनेनेदं स्पष्टं भवति यत् मानव श्रेयस्साधनानि सर्वाणि धर्मकार्यप्रचोदकानि वाक्यानि वेदे उपदिष्टानि वर्तन्ते।

स्वाध्याय धर्मः -

**"स्वाध्यायोऽध्येतव्यः"** इति तैत्तिरीयविधिवाक्यं मीमांसा शास्त्रे जिज्ञासाधिकरणे विचारितमस्ति। **"चोदना लक्षणोऽर्थो धर्मः"** इत्यारभ्य **" अन्वाहार्ये च दर्शनात्"** इत्यन्तं जैमिनि प्रोक्तं सर्वं सूत्रजातं धर्ममेव विचारयति। **" अथाऽतो धर्म जिज्ञासा "** इति सूत्रस्य अनूशीलनेन वेदाध्ययनानन्तरं धर्मविचारः कर्तव्यः इति ज्ञायते। तत्र अर्थग्रहणपूर्वकम् अध्ययनमेव स्वाध्याय विधेरर्थः। पितृपितामहादि परपरया या वेदशाखा प्राप्यते सा स्वाध्याय शब्देन उच्यते। अध्ययनं नाम गुरुमुखोच्चारणानूच्चारण रूपम्।

यागात्मकस्य धर्मस्य वेदार्थरूपत्वात् विमतमध्ययनविधेः धर्मविचार साहाय्यम्। तस्मात् अत्र कुमारिलभट्टस्य मतं जैमिनीन्यायमालायाम् अध्ययनविधिना सह प्रवर्तते।

**धर्मस्य धारणार्थकत्वम्-**

धृङ् धारणपोषणयोः इत्यस्मात् धातोः मन् प्रत्ययेन धर्मशब्दो निष्पन्नः।धातुरयं धारणार्थे पोषणार्थे च वर्तते। धारणार्थमाश्रित्य महाभारते उल्लेखः प्राप्यते यत् **" धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः**[18]" इति। पोषणं नाम पुष्टिः वृद्धिः।**" धर्मे वर्धति वर्धन्ति सर्वभूतानि सर्वदा**[19]"। माता स्वीयमपत्यं धारयति पोषयति च। अत एव कथ्यते - **"गर्भधारण पोषणाभ्यां पितुर्माता गरीयसी**[20]" इति।। तर्हि धारणपोषणशक्तिः धर्मे मातरि च वर्तते। अतः धर्मो मातेव रक्षति।

**वेदः भगवान् धर्मवृषः-**

कर्तुः अभीप्सितवर्षणात् वृष इत्युच्यते।" **वृषो हि भगवान् धर्मः**[21]" इति मनुस्मृतौ महाभारते च। भगवान् वेदोऽपि धर्मवृषाकृतिः अस्ति। तथा च श्रूयते -

**" चत्वारि शृङ्गा त्रयो अस्य पादा: ...... आविवेश**[22]" इति।

विलक्षण वृषभ रूपस्य धर्मस्य चत्वारि शृङ्गाणि विद्यन्ते। तानि च-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्**[23]।। इति।

धर्मवृषभस्य त्रयः पादाः। ते च आचार व्यवहार प्रायश्चित्ताख्य काण्डत्रयरूपाः। अस्य धर्मवृषभस्य आभ्युदयिक नैश्रेयसिक रूपे प्रवृत्ति निवृत्ति रूपे वा द्वे शीर्षे स्तः। तथा च मनुः -

**सुखाभ्युदयिकञ्चैव नैश्रेयसिकमेव च।**
**प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम्**[24]।। इति।।

अयं धर्मवृषभः सप्त हस्तैः राजते। ते च धर्मस्य स्वगत भेदाः सप्त- वर्णधर्मः,आश्रमं धर्मः,वर्णाश्रमधर्मः,गुणधर्मः,निमित्तधर्मः, साधारण-धर्मः, परमधर्मश्चेति। अत्र साधारणधर्मः अहिंसादिः, सप्तमः आत्म-ज्ञानरूपः। एवं विशिष्टो धर्मः त्रिधा बद्धः कायिक वाचिक मानसिक रूपेण त्रिधा आचरितः सन् रोरवीति भृशं शब्दायते। अत्र शब्दाः धर्मशास्त्रवचनानि। यथा-

**धर्मं चरत माऽधर्मं सत्यं वदत माऽनृतम्।**
**दीर्घं पश्यत मा ह्रस्वम् परं पश्यत माऽपरम्**[25]।। इति।
**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः**[26]।

अत्र वक्ता यज्ञरूपो धर्मः। यथा-

**वरं वृणीष्व राजेन्द्र! दाता ह्यस्ति तवानघ।**
**ये हि मे पुरूषा भक्ताः न तेषामस्ति दुर्गतिः**[27]।।

अत्र वक्ता व्यासो धर्मो वा। धर्मवक्तरि इत्यत्र आत्मनि परोक्ष-निर्देशः। सोऽयं प्रसिद्धः धर्मवृषः महादेवः मर्त्यान् मर्त्यलोकवासिनः मनुष्यान् व्याप्य वर्तते इत्यर्थः।

स्मृतिग्रन्थेषु प्रतिपादितो धर्मः -:

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च।**[28]।

अनेन इदं स्पष्टं भवति यत् धर्मस्य मुख्यं प्रमाणं परमं स्थानं भवति वेद एव। अन्यानि शास्त्रादीनि तत्प्रमाणनिरूपणाय साधनानि भवन्ति।स्मृत्यादीनां वेदमूलकतया धर्मे प्रामाण्यम्। उक्तं च रघुवंशे -

**श्रुतेरिवार्थं स्मृतिरन्वगच्छत्** [29]।।इति।।

वेदार्थस्य सम्यक् ज्ञापनाय शिक्षादि वेदाङ्गानि षट् प्रवर्तन्ते। वेदस्य निगूढार्थं विशदीकर्तुं इतिहासपुराणादि वाङ्मयं प्रवृत्तम। तथा चोक्तम्-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्**[30]।

वस्तुतः अस्माकं धर्मः वैदिक धर्मः सनातन धर्मः यस्य वैशिष्ट्यं स्मृत्यादिषु प्रतिपादितं वर्तते। तथा च पराशरः-

**मनुष्याणां हितं धर्मं वर्तमाने कलौ युगे।**
**शौचाचारं यथावच्च वद सत्यवती सुतः**[31]।। इति।

महाभारते धर्मस्य अष्टौ भेदाः प्रदर्शिताः। ते च

**इज्याध्ययनदानानि तपस्सत्यं क्षमा दमः।**
**अलोभ इति मार्गोऽयं धर्मस्यास्य विधिः स्मृतः**[32]।।

मनुनाऽपि धर्मस्य दश लक्षणानि प्रोक्तानि-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्**[33]।।

मानव धर्मस्य सारलक्षणं तत्रैवाभिहितम्-

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एतं सामयिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः**[34]।।.

सदाचारः समाजं प्रति मनुष्य विशेषस्य धर्मो भवति।

**उपसंहारः -**

धर्मार्थकाममोक्षाख्य चतुर्वर्ग फल प्राप्तिरेव मनुजानाम् अन्तिमं लक्ष्यम् अस्ति। तत्र धर्मो भवति आद्य वर्गः।महत्वपूर्णम् इदं धर्मस्य तत्त्वम्। अति सूक्ष्मं धर्मतत्त्वं लौकिकैः उपायैः अवगन्तुं न शक्यते। अतिगहनत्वात् शब्दमूलकत्वात् धर्मस्य वेदमूलकत्वम् अङ्गीकार्यमेव। यतो हि अथातो धर्मजिज्ञासा इति जैमिनि सूत्रस्य अनुशीलन प्रसङ्गे स्वाध्याय विधेः प्राधान्यम् अवगम्यते। धर्मस्य वेदे एव शाश्वती प्रतिष्ठा। सर्वज्ञानमूलत्वात् वेदस्य धर्ममूलत्वे न कापि विप्रतिपत्तिः। अतः वैदिकमार्गानुसरणेन यथा समाजस्य राष्ट्रस्य कल्याणं भवेत् तदर्थम् अस्माभिः अनवरतं यत्नः कर्तव्यः ।

**सङ्केताक्षरसूची**

| | |
|---|---|
| सायण भाष्यभूमिका | सायण भाष्यभूमिका |
| मनु | मनुस्मृतिः |
| न्याय सिद्धान्त मुक्तावली, कारिका | न्याय सिद्धान्त मुक्तावली, कारिका |
| जै.न्या.मा | जैमिनिन्यायमाला |
| तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| भ.गी. | भगवद्गीता |
| अ.सं | अथर्ववेदसंहिता |
| तै.सं | तैत्तिरीयसंहिता |
| तै.आ. | तैत्तिरीयारण्यकम् |
| मुण्डको | मुण्डकोपनिषत् |
| तै.उ | तैत्तिरीयोपनिषत् |
| ऋ.सं | ऋग्वेदसंहिता |
| ई.उ | ईशावास्योपनिषत् |
| महा.भा. वनपर्व | महाभारतः |
| स्का.पु. | स्कान्दपुराणम् |
| वसिष्ठ स्मृति | वसिष्ठस्मृतिः |
| रघुवंशम् | रघुवंशम् |
| वृद्धपराशर स्मृ. | वृद्धपराशरस्मृतिः |

**उपयुक्तग्रन्थसूची**


सायण भाष्यभूमिका
मनुस्मृतिः
न्याय सिद्धान्त मुक्तावली, कारिका
जैमिनिन्यायमाला
तैत्तिरीयब्राह्मणम्
भगवद्गीता
अथर्ववेदसंहिता
तैत्तिरीयसंहिता
तैत्तिरीयारण्यकम्
मुण्डकोपनिषत्
तैत्तिरीयोपनिषत्
ऋग्वेदसंहिता
ईशावास्योपनिषत्
महाभारतः
स्कान्दपुराणम्
वसिष्ठस्मृतिः
रघुवंशम्
वृद्धपराशरस्मृतिः


**पाद टिप्पणी**

1 सायण भाष्यभूमिका
2 मनु.2-7
3 न्याय सिद्धान्त मुक्तावली, कारिका.91
4 जै.न्या.मा-1/2
5 तै.ब्रा.2-4-7-5
6 तै.ब्रा.3-1-6
7 भ.गी.3-10
8 अ.सं
9 तै.सं 3-5-11
10 भ. गी.16/13-14
11 तै.आ.1-1
12 मुण्डको.3-1-6
13 तै.उ - शीक्षा
14 ऋ.सं 30-109-5
15 अथर्व.3-6-19
16 तै. उ 5-8
17 ई.उ 1-1
18 महा.भा. वनपर्व 69/58
19 महा. भा. शान्ति पर्व 90-97
20 स्का.पु. 4.1.11.48
21 मनु. 8-1
22 ऋ. सं 4/58
23 मनु.2-12
24 मनु. 12-18
25 वसिष्ठ स्मृति30/1
26 मनु.8-15
27 महा. भा. वनपर्व.314/11
28 मनु.2/6
29 रघुवंशम्,2-2
30 महा.आदि.1-86.
31 वृद्धपराशर स्मृ.1/3
32 महा.वन 2/7.
33 मनु 6/92
34 मनु.10/63